लवणा ७ अग्निदीप्ता ८ तेजस्विनी ९ सुरलता १० अग्निफला ११ अग्निगर्भा १२ कङ्गुनी १३ शैलसुता १४ सुतैला १५ सुवेगा १६ वायसी १७ तीव्रा १८ काकाण्डी १९ वायसादनी २० गीर्लता २१ श्रीलता २२ सौम्या २३ ब्राह्मी २४ लवणकिंशुका २५ पारावतपदी २६ पीता २७ पीततैला २८ यशस्विनी २९ मेध्या ३० मेधावती ३१ धीरा ३२। अस्या गुणाः। तिक्ततरत्वम्। रूक्षत्वम्। किञ्चित्कटुत्वम्। वातकफापहत्वम्। दाहप्रदत्वम्। दीपनत्वम्। मेधाप्रज्ञाकारित्वञ्च। इति राजनिर्घण्टः॥

महाज्वालः, पुं, (महती ज्वाला शिखास्य।) होमाग्निः। इति हेमचन्द्रः।३।५००॥ (नरकविशेषः। यथा, विष्णुपुराणे। २। ६। १२।

"स्नुषां सुताञ्चापि गत्वा महाज्वाले निपात्यते॥"

महादेवः। यथा, महाभारते।१३।१७।८१।

"अग्निज्वालो महाज्वालो अतिधूम्रो हुतो हविः॥")

महाज्वाला, स्त्री, (महती ज्वाला दीप्तिर्यस्याः।) जिनानां विद्याधरीविशेषः। इति हेमचन्द्रः।२।५००॥ (महती ज्वाला।) बृहदग्निशिखा च॥

महाढ्यः, पुं, (महान् आढ्यः शोभासम्पन्नः।) कदम्बः। इति राजनिर्घण्टः॥ (महानाढ्यः।) अतिशयधनवति, त्रि॥ (यथा, कथासरित्सागरे। २५। ११८।

"ततः प्रभृति चैतस्यां वाराणस्यामुवास सः। अभ्यर्थितो महाढ्यस्य तस्यैव वणिजो गृहे॥")

महातमःप्रभा, स्त्री, (महती तमसां प्रभा प्रकाशोऽस्याम्।) नरकविशेषः। स चातिशयान्धकारमयः। यथा, हेमचन्द्रः। ५। ३।

"घनोदधिघनवाततनुवातनभःस्थिताः।
रत्नशर्कराबालुकापङ्कधूमतमःप्रभाः॥
महातमःप्रभा चेत्यधोऽधो नरकभूमयः॥"

महातरुः, पुं, (महांश्चासौ तरुश्चेति।) स्नुहीवृक्षः। इति हेमचन्द्रः। ४। २०६॥ (महाकवेः कालिदासस्य स्नुहीवृक्षमुद्दिश्य वक्रोक्तिप्रयोगो यथा,—

"तरवः पारिजाताद्याः स्नुहीवृक्षो महातरुः॥")

बृहद्वृक्षश्च॥

महातलं, क्ली, (महच्च तत्तलञ्चेति।) पातालविशेषः। यथा, शब्दमालायाम्।

"अतलं वितलञ्चैव नितलञ्च तलातलम्।
महातलञ्च सुतलं सप्तमञ्च रसातलम्॥"

(यथा च श्रीमद्भागवते। २। १। २६।

"पातालमेतस्य हि पादमूलं
पठन्ति पार्ष्णिप्रपदे रसातलम्।
महातलं विश्वसृजोऽथ गुल्फौ
तलातलं वै पुरुषस्य जङ्घे॥")

महातारा, स्त्री, (तारयति संसारादिति। तॄ + णिच् + अच्। स्त्रियां टाप्। ततो महती तारेति कर्म्मधारयः।) जिनानां देवीविशेषः। तत्पर्य्यायः। तारा २ महाश्रीः ३ ओङ्कारा ४ स्वाहा ५ श्रीः ६ मनोरमा ७ तारिणी ८ जया ९ अनन्ता १० शिवा ११ लोकेश्वरा १२ आत्मजा १३ खदूरवासिनी १४ भद्रा १५ वैश्या १६ नीलसरस्वती १७ शङ्खिनी १८ वसुधारा १९ धनंददा २० त्रिलोचना २१ लोचना २२। इति हेमचन्द्रः॥

महाताली, स्त्री, (महान् अनेकस्तालो यत्र। स्त्रियां ङीष्।) आवर्त्तकी इति राजनिर्घण्टः॥

महातिक्तः, पुं, (महानतिशयस्तिक्तस्तिक्तरसो यत्र।) महानिम्बः। इति राजनिर्घण्टः॥ अतिशयतिक्तरसयुक्ते, त्रि॥

महातिक्ता, स्त्री, (महती गुरुतरा तिक्ता।) यवतिक्ता। इति राजनिर्घण्टः॥ (यथा, गोविन्दविशारदकृतभैषज्यरत्नावल्याम्।

"आपु चिञ्ची महातिक्ता विशाला क्षुपिपत्रकम्॥")

पाठा। इति शब्दचन्द्रिका॥

महातीक्ष्णा, स्त्री, (महती तीक्ष्णा।) भल्लातकवृक्षः। इति राजनिर्घण्टः॥ अतिशयतीक्ष्णे, त्रि॥

महातेजः, [स्] क्ली, (महदतिशयं तेजोऽस्य।) पारदः। इति राजनिर्घण्टः॥

महातेजाः, [स्] पुं, (महदतिशयं तेजो बलमस्य।) कार्त्तिकेयः। इति हलायुधः। अग्निः। इति शब्दचन्द्रिका॥ (महादेवः। यथा, महाभारते। १३। १७। ५६।

"उग्रतेजा महातेजा जन्यो विजयकालवित्॥")

अतिशयतेजस्विनि, त्रि॥ (यथा, मनुः।१।६२।

"स्वारोचिषश्चौत्तमिश्च तामसो रैवतस्तथा।
चाक्षुषश्च महातेजा विवस्वत्सुत एव च॥")

महात्मा, [न्] त्रि, (महानात्मा स्वभावोऽस्य।) उत्तमस्वभावयुक्तः। (यथा, कामन्दकीयनीतिसारे। ३। ११।

"महावाताहृतभ्रान्तिमेघमालातिचेतवैः।
कथं नाम महात्मानो ह्रियन्ते विषयारिभिः॥")

तत्पर्य्यायः। महेच्छः २ उद्भटः ३ उदारः ४ उदात्तः ५ उदीर्णः ६ महाशयः ७ महामनाः ८। इति हेमचन्द्रः। ३। ३१॥ (पुं, परमात्मा। यथा, मनुः। १। ५४।

"युगपत्तु प्रलीयन्ते यदा तस्मिन् महात्मनि।
तदायं सर्व्वभूतात्मा सुखं स्वपिति निर्वृतः॥"

"तस्मिन् परमात्मनि।" इति तट्टीकायां कुल्लूकः॥ महत्तत्त्वम्। यथा, श्रीमद्भागवते। ९। ७। २५।

"मनः पृथिव्यां तामद्भिस्तेजसापोऽनिलेन तत्।
खे वायुं धारयंस्तच्च भूतादौ तं महात्मनि॥"

"महात्मनि महत्तत्त्वे।" इति तट्टीकायां श्रीधरस्वामी॥ पितृगणविशेषः। यथा, मार्कण्डेये। ९६। ४६।

"महान् महात्मा महितो महिमावान् महाबलः॥"

महादेवः। यथा, महाभारते। १३।१७।३४।

"महारूपो महाकायो वृषरूपो महायशाः।
महात्मा सर्व्वभूतात्मा विश्वरूपो महाहनुः॥")

महादण्डः, पुं, (महान् दण्डस्ताडनसाधनमस्य।) यमदूतप्रभेदः। इति वृहद्धर्म्मपुराणे ५६ अध्यायः॥ (महान् दण्डः।) वृहद्दण्डश्च॥ (यथा, महाभारते। ५। १६४। ३७।

"यस्माज्जानन् स मन्दात्मा मामसौ नोपसर्पति।
तस्मात्तस्मै महादण्डो धार्य्यः स्यादिति मे मतिः॥")

महादन्तः, पुं, (महांश्चासौ दन्तश्चेति।) गजदन्तः। तत्पर्य्यायः। ईशादन्तः २। इति त्रिकाण्डशेषः॥ वृहद्दन्तमात्रञ्च॥ (महादेवः। यथा, महाभारते। १३। १७। ८७।

"महादन्तो महादंष्ट्रो महाजिह्वो महामुखः॥"

महान् दन्तोऽस्य।) तद्वति, त्रि॥

महादानं, क्ली, (महच्च तद्दानञ्चेति।) श्रेष्ठदानम्। तत्तु तुलापुरुषादिषोड़शप्रकारम्। यथा, मत्स्यपुराणे।

"अथातः संप्रवक्ष्यामि महादानस्य लक्षणम्॥"

इत्यभिधाय।

"आद्यन्तु सर्व्वदानानां तुलापुरुषसंज्ञितम्।
हिरण्यगर्भदानञ्च ब्रह्माण्डं तदनन्तरम्॥
कल्पपादपदानञ्च गोसहस्रन्तु पञ्चमम्।
हिरण्यकामधेनुश्च हिरण्याश्वस्तथैव च॥
पञ्चलाङ्गलकं तद्वद्धरादानन्तथैव च।
हिरण्याश्वरथस्तद्वद्धेमहस्तिरथस्तथा॥
द्वादशं विष्णुचक्रञ्च ततः कल्पलतात्मकम्।
सप्तसागरदानञ्च रत्नधेनुस्तथैव च।
महाभूतघटस्तद्वत् षोड़शः परिकीर्त्तितः॥"*॥

अत्र सामान्यलक्षणम्। सकृज्जपाङ्गकदानं महादानम्। विनायकादिपञ्चाशद्देवताहोमाङ्गकं वा। तथा मत्स्यपुराणम्।

"विनायकादिग्रहलोकपाल-
वस्वष्टकादित्यमरुद्गणानाम्।
ब्रह्माच्युतेशानदिवस्पतीनां
स्वमन्त्रतो होमचतुष्टयं स्यात्॥
जप्यानि सूक्तानि तथैव चैषा-
मनुक्रमेणापि यथास्वरूपम्॥"

इत्यादिना सकृज्जपहोमरूपाङ्गयोर्व्विधानं प्रत्येकं षोड़शतुलापुरुषप्रधानान्युद्दिश्योक्तं नतु महादानत्वेनोद्दिश्येति। अतो नेतरेतराश्रयः। न तु कृष्णमण्डपेतिकर्त्तव्यतायोगित्वं निरूकनीयलक्षणम्। अचलदानेऽपि गतत्वात्। एवञ्च।

"कनकाश्वतिला नागा दासी रथमहीगृहाः।
कन्या च कपिला धेनुर्म्महादानानि वै दश॥"

इति कूर्म्मपुराणोक्तदानपदं गौणम्॥ अन्यथा बहुशक्तिकल्पनापत्तेः कनकदानादि-